# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road
Rajarajeshwari Nagar, Bangalore - 560 098

***SUBJECT: SANSKRIT***

***II PUC***
***MOCK - II***

***Timings Allowed: 3 Hrs 15 Minutes*** ***Total Marks: 100***

**I एकवाक्येन संस्कृतभाषया उत्तरम् लिखत–** **10X1=10**

1. विश्वस्य मातरः काः ?
2. वृद्धपक्षिराजस्य नाम किम् ?
3. राजपुत्रः मञ्जूषायाः अन्तः कं निक्षिपति ?
4. मूर्तिमती सत्क्रिया का ?
5. बालिकायाः हस्तात् रोटिकाम् आकृष्य कः अधावत् ?
6. श्वेतकेतोः तनयः कः ?
7. 'सा' शान्तिः कुत्र कार्यं करोति ?
8. कः कर्णस्य रक्तम् अपिबत् ?
9. के धनमिच्छन्ति ?
10. कृष्णशास्त्रिणां माता का ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत–(पञ्चानामेव)** **5X2=10**

11. पुराणभारते उल्लिखितानि तीर्थक्षेत्राणि कानि ?
12. नगरवासिभिः जनैः राक्षसः किम् उक्तः?
13. कन्याविषये परिव्राट् वणिजः सकाशे किं वदति ?
14. राणाप्रतापस्य प्रतिज्ञा का ?
15. महाश्वेतायाः वपुषि यौवनं कथं पदं कृतम् ?
16. शान्तिः किमर्थं तरुणं द्रष्टुम् आगतवती ?
17. कर्णं प्रति परशुरामोपदेशं लिखत ?

**III पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड–आङ्ग्लभाषया वा कुरुत –(त्रयाणामेव)** **3X3=9**

18. ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ।
    अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥
19. स तस्य दशनैर्नासां नखैः कर्णौ च तत्क्षणम् ।
    चिच्छेद पापस्य कपिर्निग्रहज्ञ इव कृधा ॥
20. कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
    बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम ॥
21. अस्त्रप्रयोगवेलायां यदा ते सूतभावना ।
    तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि ॥
22. कामधेनुगुणा विद्या ह्यकाले फलदायिनी ।
    प्रवासे मातृसदृशी विद्या गुप्तधनं स्मृतम् ॥

**IV** **पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत –(चतुर्णामेव)** **4X2=8**

23. यो दुःखी सः सुहृदि दुःखं निवेद्य सुखी भवति ।
24. अनार्य , आत्मनो हृदयानुमानेन पश्यसि ।
25. मम जीवनं सार्थकं भवेत् ।
26. धैर्यधना हि साधवः ।
27. अहो ! भग्नप्रतिज्ञोऽस्मि ।
28. परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ।

**V** **दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत–(पञ्चानामेव)** **5X5=25**

29. विक्रमादित्यस्य परोपकारगुणं वर्णयत ।
30. दीर्घापाङ्गप्रसङ्गः ।
31. भामाशाहस्य राजभक्तिः ।
32. पुण्डरीकस्य जन्मवृत्तान्तं लिखत ।
33. कर्ण–परशुरामयोः संवादः ।
34. शास्त्रिणाम् शिष्यवात्सल्यम् ।
35. 'निर्विमर्शा हि भीरवः' इति शीर्षिकां समर्थयत ।
36. शान्तिः किमर्थं तरुणं द्रष्टुम् आगतवती ।

**VI** **मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत–** **4X1=4**

37. उपरि न्यस्तदीपायां _____क्षिप्यतां त्वया ।
38. वैरिणां _____समुद्रोपमम् आसीत् ।
39. मे हृदयात् किल्बिषमेकं _____ ।
40. वत्स _____उन्मील्याद्य पश्य ।

[ सैन्यं , निर्मूलितवती , चक्षुषी , गङ्गायां]

**VII** **41. संयोजयत–** **4X1=4**

| **क** | **ख** |
|---|---|
| परिव्राड् | दुष्यन्तः |
| पौरवः | दिल्लीश्वरः |
| अक्बर्बादशह | गौरी |
| हंसः | कामवशगः |

**VIII** **रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत–(त्रयाणामेव)** **3X1=3**

42. परिव्राट् <u>मौनं</u> त्यक्त्वा उक्तवान् ।
43. <u>परदुःखेन</u> साधवोऽत्यन्तदुःखिनो भवन्ति ।
44. <u>प्रमदा</u> परिणेतुः समीपे इष्यते ।
45. <u>उद्योगाः</u> अस्मत् प्रतीक्षायां न तिष्ठन्ति ।
46. भाषासाहित्यविद्यार्थिभिः <u>संस्कृतभाषा</u> अध्येतव्या एव ।

**IX** **यथानिर्देशं कुरुत –(चतुर्णामेव)** **4X3=12**

**47. <u>सन्धिं विभजत / योजयत–(त्रयाणामेव)</u>**

किमप्याश्चर्यम् , तथेति , क्षितिपः+तथा , यत्+अहम् , मम+ऊरुद्वयम्

**48. <u>विग्रहवाक्यं / समस्तपदं लिखत–(त्रयाणामेव)</u>**

निद्राभङ्गः , मुखकमलम् , क्रमम् अनुगम्य , योगिनः वेषम् , स्वस्य जन्मस्थानम्

**49. लिङ्ग–विभक्ति–वचनानि लिखत–(द्वयोरेव)**

प्रजानाम् , कौतुकात् , मया , वाचा

**50. लकार–पुरुष–वचनानि लिखत–(द्वयोरेव)**

भवेत् , अपश्यम् , श्रुणु , बभूव

**51. पदपरिचयं कुरुत–(त्रयाणामेव)**

निरीक्ष्य , पुरतः , प्रविष्टः , अध्येतव्यः , अन्यथा

**52. प्रयोगं परिवर्तयत–**

मया सा दृश्यते ।

**अथवा**

गङ्गायां क्षिप्यतां त्वया ।

**53. अलङ्कारं सलक्षणं निर्दिशत–**

तमभ्यधावत् स्वकृतो मूर्तिमानिव दुर्नयः ।

**अथवा**

रतेः बाष्पबिन्दुभिः आरचितामिव स्फटिकाक्षमालिकाम् ।

**54. कन्नडभाषया–आङ्ग्लभाषया वा अनुवदत–** **5**

भारतीयसंस्कृतिः विश्वस्य सर्वासु संस्कृतिषु प्राचीना , श्रेष्ठा , प्रेष्ठा च इति विद्वद्भिः स्वीक्रियते । यदा विश्वस्य अन्येषां देशानां निवासिनः सभ्यताहीनाः , संस्कृतिविहीनाः च स्वजीवनयापनं कुर्वन्तः आसन् , तस्मिन्नेव काले भारतीय संस्कृतिः परमोत्कृष्टा विराजमाना च आसीत् । अत्र विचारस्वातन्त्र्यम् , सदाचारपालनं , धार्मिकता , दुःखसहिष्णुता , ज्ञानप्राधान्यं , विश्वबन्धुत्वस्थापनं चेत्यादयः विशेषगुणाः विराजन्ते । अत एव भारतीया संस्कृतिः सर्वैः प्रशंस्यते ।

**55. संस्कृतभाषया अनुवदत–** **5**

ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೇಯನು ಶಿವನ ಕಿರಿಯ ಮಗ. ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯ ಮಗ. ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೇರನು ಪರಮಮಿತ್ರ. ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಮಡದಿ. ಮಾವನು ಪರ್ವತರಾಜ. ಅವನ ವಾಹನವು ನಂದಿ. ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ. ಇಂತಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ. ಎಂತಹ ವಿಧಿವಿಪರ್ಯಾಸ !

Kartikeya , the destroyer of demon Taraka , ia the younger son of Lord Shiva. Ganesha , the remover of obstacles is His elder son. Kubera , the Lord of Wealth is His friend. Parvathi , the Mother of Universe is His wife. Parvatharaja , the King of Mountains is His father-in-law. Nandi is His vehicle. Veerabhadra is His chief of army. In spite of all this Lord Shiva begs. What a destiny!

**56. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–** **5X1=5**

'कविकुलगुरुरिति' विख्यातः महाकविः कालिदासः गुप्तनृपाणाम् आस्थाने अविद्यत । सः सरस्वती सेवया कवित्वे नैपुण्यम् अलभत । तेन विरचित काव्यद्वयं महाकाव्यमिति प्रसिद्धिं प्राप्नोत् । तथैव त्रीणि नाटकानि तस्मै विख्यातिम् अदापयन् । अपिच द्वे खण्डकाव्ये सहृदयान् समाकर्षयताम् । तस्य कृतिभिः संस्कृतसाहित्यक्षेत्रं समृद्धं जातम् । एवं कविषु कालिदासः नभसि चन्द्रमा इव अशोभत । अतः अद्यापि कवयः विद्वांसः च कालिदासं बह्वादरेण पश्यन्ति ।

**प्रश्नाः–**

१. कालिदासः किमिति विख्यातः ?

२. कालिदासः केषाम् आस्थाने आसीत् ?

३. सः सरस्वती सेवया किम् अलभत ?

४. तस्य कृतिभिः किं जातम् ?

५. कालिदासः कथम् अशोभत ?

**अथवा**

दिनद्वयस्य विरामं प्रार्थयितुं प्राचार्यं प्रति पत्रं लिखत ।।

*****